**International Journal of Academic Research and Development**
**ISSN: 2455-4197**
**www.newresearchjournal.com/academic**
**Volume 1; Issue 3; March 2016; Page No. 57-58**

# संस्कृतवाङ्मयस्य नैतिकशिक्षाया राष्ट्रनिर्माणे योगदानम्

**बृजभूषण शर्मा**

शोधच्छात्रः, (S.R.F.), राजस्थान विश्वविद्यालयः, जयपुरम्, राजस्थानम्

विदितचरमेव समैरपि यदखिलेऽस्मिन् विरिञ्चि प्रपञ्चे ब्रह्मणः सर्वश्रेष्ठा कृतिर्मानव। अस्याश्च श्रेष्ठकृतेरूद्धार्थं प्रददौ विधिः विविधज्ञानविज्ञानसमन्वितां संस्कृतेराधारभूतां कर्त्तव्याकर्त्तव्यबोधिकां शुभाशुभनिदर्शिकां जीवनस्योन्नायिकां विश्वहितसम्पादिकां आचारसंचारिकां सुखशान्तिसाधिकां ज्ञानलोकप्रसारिकां चतुवर्गावाप्तिसोपानस्वरूपां संस्कृतवाङ्मयराशिं लोकाय।
अस्मिन् वाङ्मये प्रत्येकपदं नैतिकं वर्तते। इयं संस्कृतभाषा नैतिकशिक्षापरिपूर्णा अस्ति। प्राचीनानां ऋषीणां महर्षीणां कवीनां तत्त्वज्ञानां अनारतश्रमस्यैव फलमेतद् यदीदृशं विपुलं नैतिकशिक्षापरिपूर्णं संस्कृतवाङ्मयम् अस्माकं सविधे वर्तते।
नैतिकशिक्षा नाम किम् इति चेत् नीतियुता (सदाचारव्यवहारादीनाम्) शिक्षा एव नैतिकशिक्षा इति कथ्यते। श्लोकोऽयं नैतिकशिक्षां परिभाषयति—

**यस्मिन् देशे य आचार पारम्पर्यक्रमागत।**
**वर्णानां सान्तारालानां स सदाचार उच्यते।।**

अर्थात् यस्मिन् देशे यः आचारः सान्तरालानां वर्णानां परम्परया क्रमेण च आगतः स सदाचारः नैतिको व्यवहारो वा कथ्यते।
नैतिकशिक्षा किमर्थमावश्यकी इति चेत्—

**"नैतिकता एव जीवनम् अनैतिकता तु मरणम्"**

नैतिकता नाम एतादृशी भावना तथा एतादृशचिन्तनव्यवहारयोर्नाम यत्र—

1. मनुष्यः स्वात्मना सह बाह्यप्रपञ्चस्य (नानाविधा सृष्टिः) तादात्म्यं स्थापनं कर्तुं शक्नुयात्।
2. मनुष्येषु परस्परं भयसन्देहभावा—नामुन्मूलनम्
3. मनुष्येषु परस्परं विश्वास—आस्था—सहयोग—सम्मानादीनां स्थितिः।

अधुना प्रश्नः समुदेति यत् नैतिकशिक्षयापरिपूर्णमिदं संस्कृतवाङ्मयं कथं राष्ट्रनिर्माणे सहायकं भवेत्? इति चेत् —

**(1) सुशिक्षितसमाजनिर्माणार्थम्—**
व्यक्तेः बौद्धिकं चरित्रसम्बन्धिनिर्माणं च भूरिशः शिक्षाप्रणाल्यारूपरि निर्भरं भवति। एवञ्च मानवानां समूहः समाजः। समाजे यादृशाः मानवाः भवन्ति तादृशः समाजः सञ्जायते। कस्यचित् देशस्य उत्थानं पतनं च तद्देशस्य शिक्षयैव सञ्जायते। अतः सुशिक्षया एव सुसभ्यसमाजस्य निर्माणं भवितुमर्हति। सा शिक्षा कीदृशी स्यात् इति चेत—

सत्याचार — विचारशिक्षणपरा सार्वाङ्गिकीमुन्नतिम्,
छात्राणां विदधद् विवेक—विनयाचारप्रचारैकधीः।
चारित्र्योन्नतिसाधिका गुणगणैः सारल्यसंसाधिका,
लोकेषु प्रचरेत् सुशिष्यजनिदा शिक्षा सदा कामुधुक।।
अज्ञानान्धतमः प्रणोदप्रवणा लोकोपकृत्येदृक्,
पाषाण्डादिनिवारणैकमतिदा मोदावहा मानिनाम्।
सद्वृत्तेन विवर्धिताखिलगुणा या शस्यते ज्ञानिषु,
या देहात्ममनोविकासरूचिरा शिक्षाऽस्तु सा श्रेसये।।
(संस्कृत निबन्धशतकम्, श्री कपिलद्विवेदी)

**2. सदाचारपालनार्थम्—**
अद्यत्वे समाजे नैकविधाः समस्याः दरीदृश्यमानाः वर्तन्ते। उदाहरणर्थं यथा भ्रष्टाचारः, महिलानामुत्पीडनम्, व्यसनेनग्रस्ताः युवानः अवसादेन ग्रस्ताः जनाः। एतासां सर्वासामपि समस्यानां समाधानं नैतिकशिक्षया कर्तुं शक्यते। यथा—

"आचारः परमो धर्मः"
"सदाचारः सर्वोत्तमं तपः"
वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्तस्तु हतो हतः।।
(महाभारतम्)

सत्यं वद। धर्मं चर। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।
(तैतिरीयोपनिषद्, शिक्षावल्ली, 1.11.1)

**3. व्यावहारिकीशिक्षार्थम्—**
संस्कृतवाङ्मये पदे पदे व्यवहारस्य शिक्षा लभ्यते। कथं केन सह कीदृशः व्यवहारः करणीयरिति सर्वं विवृत्तमस्ति नैतिकशिक्षापरिपूर्णे संस्कृतवाङ्मयेऽस्मिन्। उदाहरणर्थं यथा — परेषां ये दारा सन्ति (अत्र दारा इति पदेन केवलं पत्नी एव न ग्राह्य अपितु माता, भग्निरित्यादयः ग्राह्यः) तान् मातृवत् पश्येत् नरः। उक्तञ्च यथा—

**मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः।।**

कविकुलललामभूतः कविताकामिनीकान्तः कालिदासः स्वीय—अभिज्ञानशाकुन्तले व्यावहारिकीशिक्षामेवं वर्णयति —

**शुश्रूषस्व गुरून् कुरू प्रियसखीवृत्तिं सपत्नीजने**
**भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकनी**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।**
(शाकु. 4.18)

अत्र पतिग्रहं गच्छन्ती शकुन्तला विदितवेदितव्येन धर्मशास्त्रलोकव्यवहारनिपुणेन पित्रा महर्षिणा कण्वेन उपदिश्यते — श्वश्रूश्वसरादिगुरूजनान् शुश्रूषस्व सपत्नीसमूहे प्रियसखिवत् व्यवहारं विधेहि, अवमानितापि क्रोधेन स्वामिनः विरूद्धं न गच्छ अर्थात् प्रतिकूलवर्त्तिनी मा भव, सेवकवृन्दे अतिशयने अनुकूला भव, निज सौभाग्येषु अगर्विता भव, अनेन प्रकारेण युवतयः गृहिणीस्थानं लभन्ते। विपरीताचरणवत्यः युवतयः पितृश्वसुरवंशस्य सन्तापजनिकाः भवन्तीति।

**4. सर्वेषां माङ्लिकीकामनार्थम्—**

संस्कृतवाङमये न केवलं एकस्य जनस्य अपितु सम्पूर्णब्रह्माण्डस्य माङ्गलिकीकामना वर्तते। यथा—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भेवत्।।
यस्तु सर्वाणि भूतानि भूतान्यात्मन्नेवानुपश्यति।
सर्वभतेषु चात्मानं ततो न विचिकित्सति।। (यजु. 40.6)
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद् विजानतः।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः।। (यजु. 40.7)

**5. राष्ट्रियभावनाप्रेरणार्थम्—**

राष्ट्रियभावना मानवानां सर्वोत्कृष्टं कर्तव्यम्। प्रत्येकऽस्मिन् मनुष्ये इयं राष्ट्रभक्तिः, राष्ट्रस्नेहः अवश्यं भावी। राष्ट्रियभावना एव तादृशीभावना या जनान् स्वदेशनिर्माणार्थं स्वराष्ट्रोन्नत्यर्थं च सर्वथा सर्वदा च प्रेरयति। इयं राष्ट्रभावना प्राचीनकालादेव अस्मांक संस्कृतवाङमये दरीदृश्यते। यथा—

"अहं राष्ट्री सङ्गमनी वसूनाम्" (ऋग्. 10.125.3)
"वयं राष्ट्रे जागृयाम पुरोहिता" (यजु. 9.23)
"माता भूमिः पुत्रो अहं पृथिन्याः" (अ. 12.1.12)
अपि स्वर्णमयी लङ्का न मे लक्षमणः रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।
न यत्र देशोद्धृतिकामनाऽऽस्ते, न मातृभूमेर्हितचिन्तनं च।
न राष्ट्ररक्षा—बलिदानभाव श्मशानतुल्यं नरजीवनं तत्।।
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं—स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।। (मनु. 2.20)

**6. विश्वबन्धुत्व—भावनार्थम्—**

अस्माकं ऋषिभिर्महर्षिभिश्च एतदेवोदीरितं यत् सर्व—भूत—हित—साधनम् अस्माकं लक्ष्यम्। अस्मांक वेदेषु यज्ञप्रक्रियायाः एतदेव महत्त्वं वर्तते यत स्वाहा (स्व—आ—हा) स्वार्थस्य सर्वथा परित्यागः यथोक्तम्—

अयं निजः परोवेति गणना लघूचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्।। (हितो. 1.69)
सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।
समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभि मन्त्रये वः, समानेन वा हविषा जुहोमि।
समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहाति।। (ऋग्.10.191.2.4)

**7. एकत्वाखण्डत्वभावनाप्रेरणार्थम्—**

संस्कृतवाङमयं सर्वथा सर्वदा च अखण्डभारतस्य समर्थनं करोतीति। अस्मांक भारतस्य कीदृशं स्वरूपं कियत् पर्यन्तं विस्तृतमिति सर्वमपि वाङ्मयेऽस्मिन् निगदितं वर्तते। यथा—

उत्तरं यत् समुद्रस्य हमाद्रेश्चैव दक्षिणम्।
वर्षतद् भारतं नाम भारती यत्र संतति।। (विष्णुपुराण 2/3/1)
उत्तरं यत्समुद्रस्य, हिमवद्दक्षिणं च यत्।
वर्षं यद् भारतं नाम, यत्रेयं भारती प्रजा।। (वायुपुराण 45/75)
आ समुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्।
तयारेवान्तर गिर्योरार्यावर्ते विदुर्बुधाः।। (मनु. 2.22)
हिमालयात् समारभ्य यावत् इन्दुसरोवरम्।
तं देवनिर्मितं देशं हिन्दुस्थानं प्रचक्षते।।

अस्यां भाषायां सः निधिः वर्तते येन निधिना अस्माकं देशस्य रक्षा एव न भाति किन्तु संपूर्णायाः मानवतायाः रक्षा समीहते। भारतीयः आदर्शः विश्वबन्धुत्वस्य आदर्शः मानवसेवायाः आदर्शः धर्मरक्षणस्य आदर्शः च अस्यां भाषायां वर्तते। संस्कृतभाषया मानवानां ह्रदये सद्भावप्रतिष्ठा भवति तया सद्भावप्रतिष्ठया लोकस्य रक्षणं भविष्यति। भ्रष्टाचारस्य उन्मूलनं, कदाचारस्य अपाकरणं, दुराचारस्य निराकरणं भविष्यति। विज्ञायते एव सर्वैः विश्वस्य अनेकेषु देशेषु संघर्षस्थितिः वर्तते, संघर्षस्थितिः अत एव वर्तते यतः ते धर्म विचारविरूद्धाः धर्महीनाः सन्ति। अस्माकं अत्र नायं अभिप्रायः साम्प्रदायिकधर्मविषये, हिन्दू—इस्लाम—क्रिश्चनविषये परंतु भगवता मनुना धर्मस्य लक्षणं यथा उक्तं तथा सर्वैः अङ्गीक्रियते चेत् सर्वेषां कल्याणं भवितुमर्हति। तद् इत्थं वर्तते—

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रयनिग्रहः।**
**धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम्।।**

इमे शाश्वतधर्मा विश्वधर्माः मानवताधर्मा न केवलं मानवानां भारतीयानां हिन्दूनां सनातनधर्माणां सनातनधर्मानुयायिनां वा ये धर्माः अपितु यथा मनुना प्रोक्त धर्मः सर्वस्य मानवस्य धर्मः वर्तते। अतः यदि व्यापकदृष्ट्या धर्मतत्वस्य संरक्षणं भवेत् तदा सर्वत्र कदाचार—दुराचार—भ्रष्टाचाराणां अपाकरणमपि अवश्यमेव भविष्यति। नास्ति तत्र काचित् शंका। तस्य च साधनं संस्कृतविद्यैव वर्तते। संस्कृतवाङ्मये वैज्ञानिकी, लौकिकी, आधुनिकी अपि सामग्री वर्तते तत्र सर्वेषां मानवानां कल्याणाय अपि सामग्री वर्तते।

एवं रीत्या संस्कृतवाङमये सद्विद्यया विद्यमानैः सदुपदेशैः सर्वोजनः शान्तिं सुसमृद्धिं च परामाप्तुमर्हतीति।

**संदर्भ ग्रन्थ सूची**


1. अभिज्ञानशाकुन्तलम्, कालिदासः, चौखम्भाप्रकाशन वाराणसी
2. ईशादि नौ उपनिषद्, गीता प्रेस गोरखपुर
3. कालिदासग्रन्थावली, पं. सीताराम चतुर्वेदी, उ.प्र. संस्कृत संस्थान
4. कालिदासग्रन्थावली, रामचन्द्र मिश्र चौखम्भासुरभारती, प्रकाशन, वाराणसी
5. नीतिशतकम्, भर्तृहरिः, चौखम्भाविद्याभवन, वाराणसी
6. पंचतन्त्रम्, विष्णुशर्मा, चौखम्भाविद्याभवन, वाराणसी
7. मनुस्मृतिः 'मन्वर्थमुक्तावली' व्याख्योपेत, श्रीकुल्लूकभट्टः, चौखम्भा संस्कृत प्रतिष्ठान, दिल्ली
8. रघुवंशमहाकाव्यम्, कालिदासः, चौखम्भा—प्रकाशन कृष्णदास अकादमी वाराणसी
9. संस्कतनिबन्धशतकम्, डॉ. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन वाराणसी
10. संस्कृत वाङ्मय का वृहद् इतिहास, बलदेव उपाध्याय, उ.प्र. संस्कृत संस्थान
11. संस्कृत साहित्य का इतिहास, आचार्य रामचन्द्र मिश्र, चौखमीाामहाविद्याभवन वाराणसी
12. संस्कृत साहित्य का इतिहास, डॉ. उमाशंकर ऋषि, चौखम्भा विश्वभारतीय वाराणसी
13. संस्कृत प्रभा, डॉ. कपिलदेव द्विवेदी, उ.प्र. संस्कृत संस्थान
14. हितोपदेशः, नारायणपण्डितः, चौखम्भाविद्याभवन, वाराणसी